"नागोद्भवो नागधनाभिलाषी
वक्रोक्तिवालो नितरां कुशीलः।
क्रोधाग्निसन्तापितबन्धुवर्गो
भर्गोपमः स्यात् किल रङ्गभूमौ॥"
इति कोष्ठीप्रदीपः॥

रङ्गसीसकार्थे क्वचित् पुंलिङ्गोऽपि दृश्यते। पाकहीनयोस्तयोर्दोषो यथा,—
"पाकहीनौ नागवङ्गौ कुष्ठगुल्मरुजाकरौ।
मेहपाण्डुकरौ वातकफमण्डलुकरौ पुनः॥"
तयोर्मारणं यथा,—
"अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत्।
म्लत्पात्रे विद्रुते नागे लौहदर्व्या च चालयेत्॥
यामैकेन भवेद्भस्म तत्तुल्याश्च मनःशिलाम्।
काञ्जिकेन द्वयं पिष्ट्वा पचेद्दृढ़पुटेन च॥
स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च॥
पुनः पुटेच्छरावाभ्यामेवं बहुभिः पुटैर्मृतिः॥"
नागः सिन्दूरवर्णाभो म्रियते सर्व्वकार्य्यकृत्।
सतिक्तमधुरो नागो म्लतो भवति भस्मसात्॥
आयुःकीर्त्तिं वीर्य्यवृद्धिं करोति सेवनात् सदा।
रोगान् हन्ति म्लतो नागो वङ्गवद्गुणकारकः॥"
इति सुखबोधः॥

नागः, पुं, (नगे भवः। नग+अण्। यद्वा, दहत्यस्मात् विषाग्निनेति। दह+"दहेर्गो लोपो दश्च नः।" उणां ५।६१। गः। अन्तलोपः। दस्य नः। बाहुलकात् नकारस्य ना।) पन्नगः। (यथा, विष्णुपुराणे। १।९।९६।
"अपहृत्य विषं नागाः क्षीरोदाच्च समुत्थितम्॥")
हस्ती। (यथा, रघुः। ४।८३।
"भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः॥")
क्रूराचारी। मेघः। नागकेशरः। पुन्नागः। नागदन्तकः। मुस्तकः। देहानिलप्रभेदः।
"उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः॥"
इति शारदातिलकटीका॥
उत्तरपदस्थिते श्रेष्ठः। इति मेदिनी। गे, १०॥ (सीसकम्। अस्योत्पत्तिर्नामानि गुणाश्च। यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत्।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम्॥"
"नागस्तु नागशततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति।
वह्निं प्रदीपयति कामबलं करोति
मृत्युञ्च नाशयति सन्ततसेवितः सः॥
पाकेन हीनौ किलवङ्गनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान्।
कण्डूं प्रमेहानिलसादशोथः
भगन्दरादीन् कुरुतः प्रयुक्तौ॥")
ताम्बूली। देशभेदः। इति नानार्थटीकायां भरतः॥ पर्व्वतविशेषः। (यथा, विष्णुपुराणे। २।२।२८।
"शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः।
कालाञ्जराद्याश्च तथा उत्तरे केसराचलाः॥")
नगे गिरौ चन्दनादितरौ वा भवः। न गच्छतीति अगः न अगः नागः इति वा। तक्षककर्कोटप्रभृतिर्देवयोनिर्मनुष्याकारः फणालाङ्गूलयुक्तः। इति भरतः॥ तत्पर्य्यायः। काद्रवेयः। २। इत्यमरः। १।८।४॥ नागोत्पत्तिर्यथा,—
"सृजता ब्रह्मणा सृष्टिं मरीचिः सूतिकारणम्।
प्रथमं मनसा ध्यातस्तस्य पुत्त्रस्तु कश्यपः॥
तस्य दाक्षायणी भार्य्या कद्रुर्नाम शुचिस्मिता।
मारीचो जनयामास तस्यां पुत्त्रान्महाबलान्॥
अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम्।
कर्कोटकञ्च राजेन्द्र! पद्मं चान्यं सरीसृपम्॥
महापद्मं तथा शङ्खं कुलिकञ्चापराजितम्।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः।
एतेषान्तु प्रसूत्या तु इदमापूरितं जगत्॥
कुटिला हीनकर्म्माणस्तीक्ष्णास्योत्थविषोल्बणाः।
दृष्ट्वा संदशेयुर्मनुजान् भस्म कुर्य्युः क्षणाद्ध्रुवम्॥
शब्दगामी यथा सर्पो मनुष्याणां नराधिप!।
अहन्यहनि जायेत क्षयः परमदारुणः॥
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्व्वाः समन्ततः।
जग्मुः शरण्यं शरणं परन्तु परमेश्वरम्॥
इममेवार्थमुद्दिश्य प्रजाः सर्व्वा महीपते!।
ऊचुः कमलजं देवं पुराणं ब्रह्मसंज्ञितम्॥
देवा ऊचुः।
देव देवेश लोकानां प्रकृतिः परमेश्वर।
त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजङ्गानां महात्मनाम्॥
अहन्यहनि ये देव! पश्येयुरुरगा दृशा।
मनुष्यं म्लगयूथं वा तत् सर्व्वं भस्मसाद्भवेत्॥
त्वया सृष्टिः कृता देव नीयते सा भुजङ्गमैः।
एतज्ज्ञात्वा तु दुर्वृत्तं तत् कुरुष्व महामते॥
ब्रह्मोवाच।
अहं रक्षां विधास्यामि भवतीनां न संशयः।
व्रजध्वं स्वानि धिष्ण्यानि प्रजापालाः ससाध्वसाः॥
एवमुक्ताः प्रजास्तेन ब्रह्मणाव्यक्तमूर्त्तिना।
आगतासु प्रजास्वाद्यास्तानाहूय भुजङ्गमान्॥
शशाप परमक्रुद्धो वासुकिप्रमुखांस्तथा।
ब्रह्मोवाच।
यतो मत्प्रभवानित्थं क्षयं नयत मानुषान्॥
भवान्तरे तथान्यस्मिन्मातुः शापात् सुदारुणात्।
भवितातिक्षयो घोरो नूनं स्वायम्भुवान्तरे॥
एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः।
निपत्य पादयोस्तस्य इदमूचुर्वचस्तदा॥
नागा ऊचुः।
भगवन्! कुटिला जातिरस्माकं भवता कृता।
विषोल्बणत्वं क्रूरत्वं दृक्शस्त्रत्वञ्च नस्तथा॥
सम्पादितं त्वया देव इदानीं शमयाच्युत!॥
ब्रह्मोवाच।
यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः।
ततः किं मनुजानित्थं भक्षयध्वं गतत्रपाः॥
नागा ऊचुः।
मर्यादां कुरु देवेश! स्थानञ्चैव पृथक् पृथक्।
नागानां वचनं श्रुत्वा देवो वचनमब्रवीत्॥
अहं करोमि वो नागाः समयं मनुजैः सह।
तदेकमनसः सर्व्वे शृणुध्वं मम शासनम्॥
पातालं वितलञ्चैव सुतलाख्यं तृतीयकम्।
दत्तं वै वसुकामानां गृहं तत्र गमिष्यथ॥
तत्र भोगान् बहुविधान् भुञ्जध्वं मम शासनात्।
तिष्ठध्वं सप्तमं यावद्रात्रान्तन्तु पुनः पुनः॥
ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ।
दायादाः सर्व्वदेवानां सुपर्णस्य च धीमतः॥
तदा प्रसूतिर्व्वः सर्व्वा भोक्ष्यते चित्रभानुना।
भवतां नैव दोषोऽयं भविष्यति न संशयः॥
ये वै क्रूरा भोगिनो दुर्विनीता-
स्तेषामन्तो भविता नान्यथैतत्।
कालं प्राप्तं भक्षयध्वं दशध्वं
तथा परान् चापकृतो मनुष्यान्॥
मन्त्रौषधैर्गारुड़मण्डलैश्च
बद्धैर्दष्टा मानवा ये चरन्ति।
तेषां भीतैर्व्वर्त्तितव्यं नचान्य-
च्चिन्त्यं कार्य्यं चान्यथा वो विनाशः॥
इतीरिते ब्रह्मणा ते भुजङ्गा
जग्मुः स्थानं स्मातलाख्यं हि सर्व्वे।
तस्थुर्भोगान् भुञ्जमानाः समग्रान्
रसातले लीलया संस्थितास्ते॥
एवं शापं ते तु लब्ध्वा प्रसादञ्च चतुर्म्मुखात्।
तस्थुः पातालनिलये मुदितेनान्तरात्मना॥
एतत् सर्व्वञ्च पञ्चम्यां तेषां जातं महात्मनाम्।
अतस्त्वियं तिथिर्धन्या सर्व्वपापहरा शुभा॥
एतस्यां संयतो यस्तु अम्लन्तु परिवर्ज्जयेत्।
क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम्॥"
इति वराहपुराणम्॥

एषां शिवभूषणप्रमाणं यथा,—
"वासुक्याद्याश्च ये सर्पा यथास्थानञ्च ते हरम्।
भूषयाञ्चक्रुरङ्गस्य शिरोवाह्वादिषु द्रुतम्॥"
इति कालिकापुराणे शिवविवाहे १८ अः।

कम्बलाश्वतरनागयोः सरस्वत्या गानवरप्राप्तिविवरणं यथा,—
"एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती।
प्रत्युवाच महात्मानं नागमश्वतरं ततः॥
सरस्वत्युवाच।
वरन्ते कम्बलभ्रातः! प्रयच्छाम्युरगाधिप!।
तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते॥
अश्वतर उवाच।
सहायं देहि देवि! त्वं पूर्व्वं कम्बलमेव मे।
समस्तस्वरसम्बद्धमुभयोः संप्रयच्छ च॥
सरस्वत्युवाच।
सप्त स्वरा ग्रामरागाः सप्त पन्नगसत्तम!।
गीतकानि च सप्तैव तावत्यश्चापि मूर्च्छनाः॥
तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत्।
एतत् सर्व्वं भवान् गाता कम्बलश्चैव ते सखा॥
ज्ञास्यते मत्प्रसादेन भुजङ्गेन्द्र परन्तथा।
चतुर्व्विधं पदं तालं त्रिप्रकारं लयत्रयम्॥
यतित्रयं तथा तोद्यं मया दत्तं चतुर्व्विधम्॥
एतद्भवान् मत्प्रसादात् पन्नगेन्द्रापरञ्च यत्।
अस्यान्तर्गतमापन्नं स्वरव्यञ्जनयोश्च यत्॥
तदशेषं मया दत्तं भवतः कम्बलस्य च।